# ॥ शास्तादशकम् ॥

लोकवीरं महापूज्यं सर्वरक्षकरं विभुम्।
पार्वती-हृदयानन्दं शास्तारं प्रणमाम्यहम्॥ १ ॥

विप्रपूज्यं विश्ववन्द्यं विष्णुशम्भोर्प्रियं सुतम्।
क्षिप्रप्रसादनिरतं शास्तारं प्रणमाम्यहम्॥ २ ॥

मतमातङ्गगमनं कारुण्यामृतपूरितम्।
सर्वविघ्नहरं देवं शास्तारं प्रणमाम्यहम्॥ ३ ॥

अस्मद्कुलेश्वरं देवम् अस्मच्छत्रुविनाशकम्।
अस्मदिष्टप्रददरं शास्तारं प्रणमाम्यहम्॥ ४ ॥

पाण्ड्येशवंशतिलकं केरळे केलिविग्रहम्।
आर्तत्राणपरं देवं शास्तारं प्रणमाम्यहम्॥ ५ ॥

त्र्यम्बकपुराधीशं गणाधिपसमन्वितम्।
गजारूढमहं वन्दे शास्तारं प्रणमाम्यहम्॥ ६ ॥

शिववीर्यसमुद्भूतं श्रीनिवासतनूद्भवं।
शिखिवाहानुजं वन्दे शास्तारं प्रणमाम्यहम्॥ ७ ॥

यस्य धन्वन्तरिर्माता पिता देवो महेश्वरः।
तं शास्तारमहं वन्दे महारोगनिवारणम्॥ ८ ॥

भूतनाथ सदानन्द सर्वभूतदयापर।
रक्ष रक्ष महाबाहो शास्त्रे तुभ्यं नमो नमः॥ ९ ॥

आश्यामकोमलविशालतनुं विचित्रं
वसोऽवसान अरुणोत्फलदामहस्तम्।
उत्तुङ्गरत्नमकुटं कुटिलाग्रकेशं
शास्तारमिष्टवरदं शरणं प्रपद्ये॥ १० ॥

॥ इति श्री-शास्तादशकं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Shasta_Dashakam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits